M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. [illegible]

Ser. 567a

Title: Raghuvaṁśa

II

567a

BDT

Raghuvaṁśa – II	Title
Kālidāsa	Author
	Editor
	Year, Vols.
	Publisher
567a	Remarks

आशूणसुरारीनवदंगनस्मीमासेवदासीकृतदुग्धसिंधुं॥ मंदस्मितोनिंदितशारदेंदुं वंदेऽरविंदा
ननसुंदरित्वं॥१॥ ॥अथेति॥ ॥अथनिशानयनानंतरं यशोधनः प्रजानामधिपः प्रजेश्वरः॥ प्रभा
ते प्रातःकाले जायया सुदक्षिणया प्रतिग्राहिते स्वीकारिते गंधमाल्ये यया तां तथोक्तां॥ पीता पानं क
लीतिपीतः पीतवानित्यर्थः॥ अर्शादिभ्योऽजिति सच्प्रत्ययः॥ पीता गावो उक्ता ब्राह्मणाः प्रति
महात्माष्येदर्शनात्॥ पीतः प्रतिबद्धः वत्सो यस्यास्तां ऋषेर्धेनुं वनाय वनं गंतुं मुमोच॥ क्रिया

अथ प्रजानामधिपः प्रभाते जायाप्रतिग्राहितगंधमाल्यां॥ वनाय पीतप्रतिबद्धवत्सां
यशोधनो धेनुमृषेर्मुमोच॥१॥ धेपिप्रदेत्याद्विदिनाच्चतुर्थी॥ जायापदसामर्थ्यात्॥ सुदक्षिण

याः पुत्रजनन॥ योग्यत्वमनुसंधेयं॥ तथाहि॥ श्रुतिः॥ पतिर्जायां प्रविशति गर्भो भूत्वा स मात
रं॥ तस्यां पुनर्नवो भूत्वा दशमे मासि जायते तज्जाया जाया भवति॥ यदस्यां जायते पुनरिति॥
यशोधन इत्यनेन पुत्रं विना कीर्त्तिलोभाज्जातुं हे गोरक्षणे प्रवृत्त इति गम्यते॥ अस्मिन्स
र्गेवृत्तमुपजातिः॥ अनंतरोदीरितलक्ष्मभाजौ पादौ यदीयावुपजातयस्ता इति॥१॥ ॥

तस्या इति॥ पांसवो दोषाः आसां संतीति पांसुलाः स्वैरिणी पांसुला चस्या दित्यमरः॥ सिध्म
प्रश्चेति लच्प्रत्ययः॥ अपांसुलानां पतिव्रतानां धुरि अग्रे कीर्त्तनीया परिगणनीया॥ मनु
ष्येश्वरधर्मपत्नी खुरन्यासैः पवित्रपांसु॥ रेणुर्द्वयोः स्त्रियां धूलिः पांसुर्ना न द्वयो रज इत्यमरः॥
तस्याः धेनोर्मार्गं स्मृतिर्मन्वादिमवाक्यं श्रुतेर्वेदस्यार्थं अभिधेयमिवान्वगच्छत्॥ अनुसृत

तस्याः खुरन्यासपवित्रपांसुमपांसुलानां धुरि कीर्त्तनीया॥ मा
र्गं मनुष्येश्वरधर्मपत्नी श्रुतेरिवार्थं स्मृतिरन्वगच्छत्॥२॥

वती च यथा च स्मृतिः॥ श्रुतिक्षुण्णमेवार्थमनुसरति॥ तथा सापि गोरखुरक्षुण्णमेव मार्गम
नुससारेत्यर्थः॥ धर्मपत्नीत्यश्वघासादिवत्तादर्थ्ये षष्ठीसमासः॥ प्रकृतिविकाराभा
वात्पांसुलपथस्त्रावपि असे पांसुलानामिति विरोधालंकारो ध्वन्यते॥२॥ ॥ ॥

निवर्त्येति ॥ दयालुः कारुणिकः ॥ स्याद्दयालुः कारुणिक इत्यमरः ॥ स्पृहिगृहीत्यादिनाआलुच्
प्रत्ययः ॥ यशोभिः सुरभिः मनोज्ञः ॥ सुरभिः स्यान्मनोज्ञोपीति विश्वः ॥ स राजा तां दयितां निःव
र्त्य सौरभेयीं कामधेनुसुतां नंदिनीं धरतीति धराः पचाद्यच् ॥ पयसां धराः पयोधराः स्तनाः
स्त्रीस्तनाब्दौ पयोधरावित्यमरः ॥ अपयोधराः पयोधराः संपद्यमानाः पयोधरीभूताः ॥

निवर्त्य राजा दयितां दयालुस्तां सौरभेयीं सुरभिर्यशोभिः ॥
पयोधरीभूतचतुःसमुद्रां जुगोप गोरूपधरामिवोर्वीम् ॥ ३ ॥

अभूततद्भावे च्विः ॥ कुगतिप्रादय इति समासः ॥ पयोधरीभूताश्चत्वारः समुद्रा यस्यास्तां ॥ अ
नेकमन्यपदार्थ इत्यनेकपदग्रहणसामर्थ्यात्त्रिपदो बहुव्रीहिः ॥ गोरूपस्य धरां उ
र्वीमिव जुगोप ररक्ष ॥ भूरक्षणप्रयत्नेनैव ररक्षेति भावः ॥ ३ ॥

व्रतायेति ॥ व्रताय धेनोरनुचरेण न तु जीवनायेति भावः ॥ तेन दिलीपेन शेषोऽवशिष्टो
ऽप्यनुयायिवर्गः ॥ अनुचरवर्गो न्यषेधि निवर्तितः ॥ शेषत्वं तु दक्षिणापेक्षया कथं तर्हि

व्रताय तेनानुचरेण धेनोर्न्यषेधि शेषोऽप्यनुयायिवर्गः ॥ न चान्यतस्तस्य श
रीररक्षा स्ववीर्यगुप्ता हि मनोः प्रसूतिः ॥ ४ ॥

आत्मरक्षणमत आह ॥ नचे
ति ॥ तस्य दिलीपस्य ॥ शरीररक्षा चान्यतः पुरुषान्तरात्तो हि यस्मात्कारणा
न्मनोः प्रसूयत इति प्रसूतिः संततिः ॥ स्ववीर्यगुप्ता स्ववीर्येणैव रक्षिता ॥ न हि
स्वस्य निवहि कस्य परोक्षे ति भावः ॥ ४ ॥

स.
३

आस्वादवद्भिरिति ॥ ॥ सम्राडिति मंडलेश्वरः ॥ येनेष्टं राजसूयेन मंडलस्येश्वरश्च यः ॥ शास्ति यश्चा सर्ग
ज्ञया राज्ञः स सम्राडथ राजकमित्यमरः ॥ स राजा आस्वादवद्भिः रसवद्भिः स्वादयुक्तैरिति
यावत् तृणानां कवलैः ग्रासैः कंडूयनैः खर्जनैः दंशानां वनमक्षिकाणां निवारणैश्च ॥ दंशस्तु

आस्वादवद्भिः कवलैस्तृणानां कंडूयनैर्दंशनिवारणैश्च ॥ अव्या
हतैः स्वैरगतैः स तस्याः सम्राट् समाराधनतत्परोऽभूत् ॥५॥

वनमक्षिकेत्यमरः ॥ अव्याहतैः अप्रतिहतैः स्वैरगतैः स्वच्छंदगमनैश्च तस्याः धेन्वाः रा
समाराधनतत्परः ॥ शुश्रूषासक्तोऽभूत् ॥ तदेव परं प्रधानं यस्य स इति तत्परः ॥ तत्परे प्रसि ३
तासक्तावित्यमरः ॥५॥ ॥

स्थित इति ॥ भूपतिः सां गां स्थितां सतीं स्थितः सन् स्थिति रूर्ध्वावस्थानं ॥ प्रयातां प्रस्थितां उच्च
लितां प्रस्थितः ॥ निषेदुषीं निषण्णां उपविष्टामित्यर्थः ॥ भाषायां सदवसश्रुव इति क्वसुप्रत्ययः
उगितश्चेति ङीप् ॥ आसनबंधे उपवेशने धीरः स्थिर उपविष्टः सन्नित्यर्थः ॥ जलं आददानां पि
बंतीं जलाभिलाषी सन् पिबन्नित्यर्थः ॥ इत्थं छायेवान्वगच्छदनुसृतवान् ॥६॥ ॥ स इति ॥ ॥ न्य

स्थितः स्थितामुच्चलितः प्रयातां निषेदुषीमासनबंधधीरः ॥ जलाभिलाषी जलमाद
दानां छायेव तां भूपतिरन्वगच्छत् ॥६॥ स न्यस्तचिह्नामपि राजलक्ष्मीं तेजोविशेषानु
मितां दधानः ॥ आसीदनाविष्कृतदानराजिरंतर्मदावस्थ इव द्विपेंद्रः ॥७॥ ॥ ॥

स्तानि परिहृतानि चिह्नानि छत्रचामरादीनि यस्यास्तां तथाभूतां अपि तेजोविशेषेण
प्रभावातिशयेन ॥ अनुमितां ॥ सर्वथा राजा एवायं न वेदितुं हितां राज्यलक्ष्मीं दधानः ॥ स राजा
अनाविष्कृतदानराजिः ॥ बहिरप्रकटीकृतमदरेखः ॥ अंतर्गतामदावस्था यस्य सः ॥
गजराजो द्विपेंद्र इवासीत् ॥७॥ ॥

लतेति॥ लतानां वल्लीनां प्रतानैः कुटिलतंतुभिः उन्नमय्य ग्रथिता ये केशाः तैरुपलक्षितः॥ इत्थंभूतलक्षणे तृतीया॥ स राजा अधिज्यं आरोपितमौर्वीकं धनुर्यस्य सो अधिज्यधन्वा सन्॥ धनुषश्चेत्यनंङादेशः॥ मुनिहोमधेनोः रक्षापदेशात् रक्षाव्याजात्॥ व

लताप्रतानोद्ग्रथितैः स केशैरधिज्यधन्वा विचचार दावं॥ रक्षोपदेशान्मुनिहोमधेनोर्वन्यान्विनेष्यन्निव दुष्टसत्वान्॥ ८॥ ॥

न्यान् वने भवान् दुष्टसत्वान् दुष्टजंतून्॥ हिंस्रा इत्यर्थः॥ व्याघ्रादीनित्यर्थः॥ सत्वमस्त्री तु जंतुष्विति अमरः॥ विनेष्यन् शिक्षयिष्यन्निव दावं वनं विचचार॥ वने च वनवह्नौ च दवो दाव इति यादवः॥ वने संचचारेत्यर्थः॥ देशकालाध्वगंतव्याः कर्मसंज्ञा ह्यकर्मणामिति दावस्य कर्मत्वं॥ ८॥

विसृष्टेत्यादि षड्भिः श्लोकैस्तस्य महामहिमतया द्रुमादयोपि राजोपचारं चक्रुरित्याह॥ विसृष्टेति॥ विसृष्टाः पार्श्वानुचराः पार्श्ववर्तिनो जना येन॥ तस्य पाशभृता वरुणेन समस्य तुल्यस्य॥ अनुभावोऽनेन सूचितः॥ तस्य राज्ञः पार्श्वयोर्द्रुमाः उन्मदानां उत्कटानां वयसां खगानां॥ खगबाल्यादिनोर्वय इत्यमरः॥ विरावैः राजापि रालोकशब्दं आलोकस्य शब्द॥

विसृष्टपार्श्वानुचरस्य तस्य पार्श्वद्रुमाः पाशभृता समस्य॥ उदीरयामासुरिवोन्मदानामालोकशब्दं वयसां विरावैः॥ मरुत्प्रयुक्ताश्च मरुत्सखाभं तमर्च्यमारादभिवर्तमानं॥

शब्दं वाचकं॥ आलोकयेति शब्दमित्यर्थः॥ उदीरयामासुरिवा वदन्निवेत्युत्प्रेक्षा॥ ९॥ मरुदिति॥ मरुत्प्रयुक्ता वायुना प्रेरिता बाललता॥ आरात् समीपे वर्तमानं॥ आराद्दूरसमीपयोरित्यमरः॥ मरुतः वायोः सखा इति॥ मरुत्सखो अग्निः स इव आभातीति मरुत्सखाभः॥ आतश्चोपसर्ग इति कप्रत्ययः॥

वं०टी.

नय:॥ अर्च्यं प्रयुंजंतं दिलीपं प्रसूतैः पुष्पैः पौरकन्याः पौरास्ताः कन्याश्च आचारलाजैरिवाव

किरन्॥ तस्योपरि विक्षिपंत्वित्यर्थः॥ सखा हि सखायमागतमुपचरतीति भावः॥१०॥ ध

नुर्भृत इति॥ धनुर्भृतोप्यस्य राज्ञो। तेन भयसंभावना दर्शिता॥ तथापि विशंकैर्निर्भीकैरंतः

करणैः कर्तृभिः दययार्द्रपारसेन स्वाभिनो भावोभिप्रायो यस्य तस्य तद्दयार्द्रभावं तदाख्यातं॥

अवाकिरन्बाललताः प्रसूनैराचारलाजैरिव पौरकन्याः॥१०॥ धनुर्भृतोप्यस्य दया

र्द्रभावमाख्यातमंतःकरणैर्विशंकैः॥ विलोकयंत्यो वपुरापुरक्ष्णां प्रकामविस्ता

रफलं हरिण्यः॥११॥ दयार्द्रभावमेतदिस्याख्यातमित्यर्थः॥ भावः सत्तास्वभावाभि

र प्रायचेष्टात्मजन्मस्वित्यमरः॥ तथाविधं वपुर्विलोकयंत्यो हरिण्यो अक्ष्णां प्रकामवि सर्ग

स्तारस्य अत्यंतविशालतायाः फलमापुः॥ विमलं कलुषीभवच्च चेतः कथयत्येव हि राम

तैषिणं रिपुं वेति न्यायेन स्वांतःकरणवृत्तिप्रामाण्यादेव विस्रब्धं ददृशुरित्यर्थः॥११॥ ५

सइति॥ मारुतपूर्णरंध्रैः॥ अत एव कूजद्भिः स्वरवद्भिः कीचकैर्वेणुविशेषैः॥ वेणवः कीच

कास्ते स्युर्ये स्वनंत्यनिलोद्धताः इत्यमरः॥ वंशः सुषिरवाद्यविशेषः॥ वंशादिकं तु सुषिरं

मित्यमरः॥ उत्पादिते संपादिते वंशस्य कृत्यं कार्यं यस्मिन्कर्मणि तत्तथा॥ कुंजेषु लतागृ

हेषु॥ निकुंजकुंजौ वा क्लीबे लतादिपिहितोदरे इत्यमरः॥ वनदेवताभिरुद्गीयमानं उच्चै

र्गं पि स कीचकैर्मारुतपूर्णरंध्रैः कूजद्भिरापादितवंशकृत्यं॥ शुश्राव कुंजेषु यशः

स्वमुच्चैरुद्गीयमानं वनदेवताभिः॥१२॥ पृक्तस्तुषारैर्गिरिनिर्झराणामनोकहाकंपित

पुष्पगंधि॥

गीयमानं स्वं यशः शुश्राव श्रुतवान्॥१२॥ पृक्त इति॥ गिरिषु निर्झराणां प्र

वाहाणां॥ प्रवाहो निर्झरो झर इत्यमरः॥ तुषारैः सीकरैः तुषारो हिमसीकराविति शा

श्वतः॥ पृक्तः संपृक्तः॥ अनोकहानां वृक्षाणामाकंपितानि ईषत्कंपितानि पुष्पाणि ते

षामयो गंधः सोस्यास्तीति तथोक्तः॥ ॥

एवं शीतो मंदः सुरभिः पवनो वायुः ॥ अनातपत्रं व्रतार्थं परिहृतछत्रं अत एवातपक्लांतं
आचारपूतं शुद्धं तं नृपं सिषेवे ॥ आचारपूतत्वात्स राजा जगत्पावनस्यापि सेव्य आ
सीदिति भावः ॥ १३ ॥ शशामेति ॥ गोप्तरि तस्मिन् राज्ञि वनं गाहमाने प्रविशति सति ।
वृष्ट्या विनापि दवाग्निर्वनाग्निः ॥ दवदावौ वनानलेवने इति हैमः ॥ शशाम फलानां पुष्प

तमातपक्लांतमनातपत्रमाचारपूतं पवनः सिषेवे ॥ १३ ॥ शशाम वृष्ट्यापि विना दवा
ग्निरासीद्विशेषा फलपुष्पवृद्धिः ॥ ऊनं न सत्वेष्वधिको बबाधे तस्मिन्वनं गोप्तरि
गाहमाने ॥ १४ ॥

णां च वृद्धिः ॥ विशिष्यत इति विशेषा अतिशयिता आसीत् ॥ कर्म
येघञ्प्रत्ययः ॥ सत्वेषु जंतुषु मध्ये ॥ यतश्च निर्धारणमिति सप्तमी ॥ अधिकः प्रबलः
ऊनं दुर्बलं हरिणादिकं न बबाधे ॥ १४ ॥ ॥

संचारितेति ॥ पल्लवस्य रागो वर्णः पल्लवरागः ॥ रागोऽनुरक्तौ मात्सर्ये क्लेशादौ लोहितादिषु
ति शाश्वतः ॥ सैव ताम्रा पल्लवरागताम्रा ॥ पतंगस्य सूर्यस्य प्रभा कांतिः ॥ पारदे शलभे शालौ
पतंगः पक्षिसूर्ययोरिति शाश्वतः ॥ मुनेः धेनुश्च दिगंतराणि दिशामवकाशान् ॥ अंतरमव
काशावधी त्वमरः ॥ संचारेण पूतानि शुद्धानि कृत्वा दिनांते सायंकाले निलयाय अ

संचारपूतानि दिगंतराणि कृत्वा दिनांते निलयाय गंतुं ॥ प्रचक्रमे पल्लवराग
ताम्रा प्रभा पतंगस्य मुनेश्च धेनुः ॥ १५ ॥ तां देवतापित्रतिथिक्रियार्थामन्वग्य
योमध्यमलोकपालः ॥

स्तमयाय धेनुपेक्षे आलयाय च गंतुं प्रचक्रमे ॥ १५ ॥ तामिति ॥
मध्यमलोकपालः ॥ भूलोकपालः ॥ देवतापित्रतिथीनां क्रियाः ॥ यागश्राध
दानानि ॥ ता एवार्थः प्रयोजनं यस्याः सा तां धेनुं अन्वक् अनु पदं ययौ ॥ ॥

रघुं·टी·सं· सतांमतेनसाङ्गिमान्येनगतिबुधीत्यादिनावर्त्तमानेक्तः॥कस्यचवर्त्तमानइतिषष्ठी॥तेनराज्ञाउप सर्ग·२
७ पन्नयुक्तासाधेनुः॥सतांमतेनविधिनाशुष्टानेनउपपन्नायुक्तासाक्षात्प्रत्यक्षाश्रधाश्रास्तिक्य
बुधिरिवबभौच॥१६॥ ॥सइति॥ ॥सराजापल्वलेभ्यःअल्पजलाशयेभ्यउत्तीर्णानिनिर्गतानिवराहा
णांयूथानिकुलानियेषुतानि॥बर्हाणिसंतिएषामितिबर्हिणाःमयूराः॥मयूरोबर्हिणोबर्हीत्यम
रः॥फलबर्हाभ्यामिननूवक्तव्यः॥आवासवृक्षाणामुन्मुखाबर्हिणोयेषुतानिश्यामायमाना
वर्णौचस्मातेनसतांमतेनश्रधेवसाक्षाद्विधिनोपपन्ना॥१६॥सपल्वलोत्तीर्णवराहयूथा
न्यावासवृक्षोन्मुखबर्हिणानि॥ययौमृगाध्यासितशाद्वलानिश्यामायमानानिवनानिपश्यन् द्वि
॥१७॥
निवराहबर्हिणादिरूपमलिनत्वात्श्यामानिभवंतिश्यामायमानानि॥लोहितादिडाच्भ्यःक्यप्
बितिक्यप्प्रत्ययः॥वाक्यप्इत्यात्मनेपदेशानच्॥मृगैरध्यासिताःअधिष्टिताःशाद्वलायेषु राम
तानि॥शादाःशष्पाणियेषुदेशेषुसंतीतिशाद्वलाःशष्परूपामादेशाः॥शाद्वलःशादहरित ७
इत्यमरः॥शादःकर्दमशष्पयोरितिविश्वः॥नडशादात्डूलजितिड्वलच्प्रत्ययः॥वनानिपश्यन्
ययौ॥१७

आपीनेति॥ ॥गृष्टिःसकृत्प्रसूतागौः॥गृष्टिःसकृत्प्रसूतागौरितिहलायुधः॥नरेंद्रश्च
उभौयथाक्रमंआपीनमूधः॥ऊधस्तुक्लीबमापीनमित्यमरः॥आपीनभारोद्वहनेप्र
यत्नात्मायासात्वपुषोगुरुत्वादाधिक्याच्चअंचिताभ्यांचारुभ्यांगताभ्यांगमनाभ्यां

आपीनभारोद्वहनेप्रयत्नात्गृष्टिर्गुरुत्वाद्वपुषोनरेंद्रः॥उभावलं
चक्रतुरंचिताभ्यांतपोवनावृत्तिपथंगताभ्यां॥१८॥वसिष्ट
धेनोरनुयायिनंतमावर्त्तमानंवनितावनांतात्॥ ॥श्री॥ ॥

तपोवनादावृत्तेःपंथानंतपोवनावृत्तिपथं॥ऋक्पूरित्यादिनाअकारप्रत्ययः॥
समासांतः॥अलंचक्रतुःभूषितवंतौ॥१८॥ ॥वसिष्टधेनेरनुयायिनमनुचरंव
नांतादावर्त्तमानांप्रत्यागतंतंदिलीपंवनितासुदक्षिणा॥ ॥

रं॰टी॰ सं निमेषेण अलसा मंदा पक्ष्मणां पंक्तिर्यस्याः सा अनिमेषा सतीत्यर्थः ॥ लोचनाभ्यां करणाभ्यां इ सर्ग॰२
व उपवासो भोजननिवृत्तिः तद्वद्भ्यामिव ॥ वसतेः कर्त्तरि क्तः ॥ पपौ ॥ पयोपोषितोऽति
तृष्णया जलमधिकं पिपासति ॥ तद्वदतितृष्णयाधिकं व्यलोकयदित्यर्थः ॥ १९ ॥ पुर
स्कृतेति ॥ वर्त्मनि पार्थिवेन पृथिव्या ईश्वरेण तस्येदमित्यण्प्रत्ययः ॥ पुरस्कृता अ

पपौ निमेषालसपक्ष्मपंक्तिरुपोषिताभ्यामिव लोचनाभ्यां ॥ १९ ॥ पुरस्कृता वर्त्मनि
पार्थिवेन प्रत्युद्गता पार्थिवधर्मपत्न्या ॥ तदंतरे सा विरराज धेनुर्दिनक्षपामध्यगते
व संध्या ॥ २० ॥

यता: अग्रेकृता ॥ धर्मस्य पत्नी धर्मपत्नी ॥ धर्मार्थपत्नीत्यर्थः ॥ अ
श्वघासादिवत्तादर्थ्ये षष्ठीसमासः ॥ पार्थिवस्य धर्मपत्न्या प्रत्युद्गता ॥ सा धेनुस्तदं रा
तरे तयोर्दंपत्योर्मध्ये दिनक्षपयोः दिनरात्र्योः मध्यगता संध्येव विरराज ॥ २० ॥ ४

प्रदक्षिणीकृत्येति ॥ अक्षतानां पात्रेण सह वर्त्तत इति साक्षतपात्रो हस्तो यस्याः सा सु
दक्षिणा पयस्विनीं प्रशस्तक्षीरां तां धेनुं प्रदक्षिणीकृत्य प्रणम्य च अस्याः धेन्वाः विशा
लं शृंगांतरं शृंगमध्यं अर्थसिद्धेः कार्यसिद्धेः द्वारमिव प्रवेशमार्गमिव आनर्च्च

प्रदक्षिणीकृत्य पयस्विनीं तां सुदक्षिणा साक्षतपात्रहस्ता ॥ प्र
णम्य चानर्च्च विशालमस्याः शृंगांतरं द्वारमिवार्थसिद्धेः ॥ २१ ॥ व
त्सोत्सुकापि स्तिमिता सपर्यां प्रत्यग्रहीत्सेति ननंदतुस्तौ ॥ ॥

र्च्चयामास ॥ अर्च्चयते र्णौ वादिकत्वात् लिट् ॥ २१ ॥ वत्सोत्सुकेति ॥ सा धेनुर्वत्सोत्सु
कापि वत्से उत्सुका उत्कंठितापि स्तिमिता निश्चला सती सपर्यां पूजां प्रत्यग्रहीत्
इति हेतोस्तौ दंपती ननंदतुः ॥ पूजास्वीकारस्य हेतुमाह ॥ व ॥

भक्त्येति ॥ ॥ पूज्येषु अनुरागो भक्तिस्तया उपपन्नेषु युक्तेषु विषये ॥ तस्याः धेनोर्विधेव वि धा प्रकारो येषां तेषां महतामित्यर्थः ॥ प्रसादस्य चिन्हानि लिंगानि पूजास्वीकारादीनि पुरः फलानि पुरोगतानि प्रत्यासन्नानि फलानि येषां तानि ॥ हि अविलंबित फलस्य च कार्य्य गदर्शनादानंदो युज्यत इत्यर्थः ॥ २२ ॥ ॥ गुरोरिति ॥ ॥ भुजोच्छिन्नरिपुर्दिलीपः सदार

भक्त्योपपन्नेषु हि तद्विधानां प्रसादचिन्हानि पुरः फलानि ॥ २२ ॥

गुरोः सदारस्य निपीड्य पादौ समाप्य सांध्यं च विधिं दिलीपः ॥

दोहावसाने पुनरेव दोग्ध्रीं भेजे भुजोच्छिन्नरिपुर्निषण्णां ॥ २३ ॥ ॥

स्य दारैः रुं धत्या सह वर्त्तमानस्य गुरो रुन्नयोरपात्यर्थः ॥ पादौ निपीड्य अभिवंद्य सांध्यं संध्यायां भवं विहितं विधिं अनुष्ठानं च समाप्य दोहावसाने निषण्णां आसीनां दोग्ध्रीं दोहनशीलां धेनुमेव ॥ तन्निति निनत्प्रत्ययः पुनर्भेजे सेवितवान् ॥ दोग्ध्रीमिति निरुपपद प्रयोगात्क्रमे धेनुत्वगम्यते ॥ २३ ॥ ॥

तामिति ॥ ॥ गोप्ता रक्षकः गृहिणी सहायः पत्नी द्वितीयः स नृपः तामपीत्यर्थः ॥ अंतिके न्यस्ताः ब लयः प्रदीपाश्च यस्यास्तां तथोक्तां तां पूर्वोक्तां निषण्णां धेनुमन्वास्य अन्नृपाविरूपक्रमेण सुप्ता म नु अनंतरं संविवेश ॥ सुष्वाप ॥ प्रातः सुप्तोत्थितां अनूदतिष्ठत् उत्थितवान् ॥ अत्रानु शब्देन धेनुराज व्यापारयोः पौर्वापर्य्यमुच्यते ॥ क्रम शब्देन धेनुव्यापाराणामित्यपौ

तामंतिकन्यस्तबलिप्रदीपामन्वास्य गोप्ता गृहिणीसहायः ॥ क्रमेण सुप्तामनुसं विवेश सुप्तोत्थितां प्रातरनूदतिष्ठत् ॥ २४ ॥ इत्थं व्रतं धारयतः प्रजार्थं समं महि ष्या महनीयकीर्त्तेः ॥

नरुत्वं ॥ कर्मप्रवचनीययुक्ते इति द्वितीया ॥ २४ ॥ ॥ इत्थमिति ॥ इत्थमनेन प्रकारेण प्रजार्थं संतानाय महिष्या सममभिषिक्तस्य पत्न्या सह ॥ कृ ताभिषेका महिषीत्यमरः ॥ व्रतं धारयतः महनीया पूज्या कीर्त्तिर्यस्य तस्य हीनाना मुधरेण्यदीन विमोचने दीक्षितस्य न ॥

रघु॰टी॰स॰ यस्य त्रयो गुणा आवृत्तयो येषां तानि त्रिगुणानि त्रिरावृत्तानि सप्तदिनानि। एकविंशतिदिनानि व्य सर्ग

१० तीयुः॥२५॥ ॥अन्येद्युरिति॥ ॥अन्येद्युः अन्यस्मिन्दिने द्वाविंशे दिने॥ सद्यःपरुत्परार्यैषमःत्यादिना नि

पातनादव्ययं॥ अद्यात्रह्यपूर्वेद्युरित्यादौ पूर्वोत्तरापरात्॥ तथाधरान्यान्यतरेतरात्

पूर्वेद्युरादय इत्यमरः॥ मुनिहोमधेनुरात्मानुचरस्य नृपस्य भावं अभिप्रायं दृढभक्तित्वं।

सप्त व्यतीयुस्त्रिगुणानि तस्य दिनानि दीनोद्धरणोचितस्य॥२५॥ अन्येद्युरात्मानुच

रस्य भावं जिज्ञासमाना मुनिहोमधेनुः॥ गंगाप्रपातान्तविरूढशष्पं गौरीगुरो

र्गह्वरमाविवेश॥२६॥ भावोभिप्राय आशय इत्यमरः॥ जिज्ञासमाना ज्ञातुमिच्छती॥

ज्ञाश्रुस्मृदृशां सन इत्यात्मनेपदेशेन च॥ प्रपतत्यस्मिन्निति प्रपातः पतनप्रदेशः॥

गंगायाः प्रपातस्तस्यान्ते समीपे विरूढानि जातानि शष्पाणि बालतृणानि यस्मिंस्तत्॥ २

शष्पं बालतृणं घास इत्यमरः॥ गौरीगुरोः पार्वतीपितुः हिमवतो गह्वरं गुहां आविवे १०

श॥२६॥

मते॥ ॥सा धेनुः हिंस्रैर्व्याघ्रादिभिर्मनसापि दुःप्रधर्षा दुर्धर्षा इति हेतोः अद्रिशोभायां प्रहितेक्षणे

न॥ दत्तदृष्टिना नृपेण अलक्षितमत्युत्पतनमभिमुख्येनोत्पतनं यस्य स सिंहस्तां धेनुं प्रसह्य ह

ठात् प्रसह्य तु हठार्थकमित्यमरः॥ चकर्ष किलेत्यलीके॥२७॥ ॥तदीयमिति॥ ॥गुहानि

सा दुःप्रधर्षा मनसापि हिंस्रैरित्यद्रिशोभाप्रहितेक्षणेन॥ अलक्षिताभ्युत्पतनो

नृपेण प्रसह्य सिंहः किल तां चकर्ष॥२७॥ तदीयमाक्रंदितमार्तसाधोर्गुहानि

बद्धप्रतिशब्ददीर्घं॥ रश्मिष्विवादाय नगेंद्रसक्तां निवर्तयामास नृपस्य दृष्टिं॥

॥२८॥ बद्धेन प्रतिशब्देन प्रतिध्वनिना दीर्घं तस्याः इदं तदीयं आक्रंदितमार्तघोषणं॥

आर्तेषु पीडितेषु साधोर्हितकारिणो नृपस्य नगेंद्रसक्तां दृष्टिं रश्मिषु प्रग्रहेषु॥ कि

रणप्रग्रहौ रश्मी इत्यमरः॥ आदाय इव गृहीत्वेव निवर्तयामास॥२८॥ ॥

स इति ॥ ॥ धनुर्धरः स नृपः पाटलायां रक्तवर्णायां गवि तस्थिवांसं संस्थितं ॥ क्वसुश्चेति क्वसु
प्रत्ययः ॥ केसरिणं सिंहं सानुमतोऽद्रेर्धातोर्गैरिकस्य विकारो धातुमयी तस्यामधित्य
कायामूर्ध्वभूमौ ॥ उपत्यकाद्रेरासन्ना भूमिरूर्ध्वमधित्यका ॥ इत्यमरः ॥ उपाधिभ्यां त्यक

स पाटलायां गवि तस्थिवांसं धनुर्धरः केसरिणं ददर्श ॥ अधित्यका
यामिव धातुमय्यां रोध्रद्रुमं सानुमतः प्रफुल्लं ॥ २९ ॥ ॥

न्नासन्नारूढयोरित्यकन्प्रत्ययः ॥ प्रफुल्लो विकसितस्तं ॥ फुल्ल विकसने इति धातोः प
चाद्यच् ॥ रोध्राख्यं द्रुममिव ददर्श ॥ प्रफुल्लमिति कारपाठे ञिफला विशरणे इति धा
तोः कर्तरि क्तः ॥ उत्परस्यातः इत्युकारादेशः ॥ २९ ॥ ॥ श्रीरामाय नमः ॥ ॥

तत इति ॥ ॥ ततः सिंहदर्शनानंतरं मृगेंद्रगामी सिंहगामी शरण्यं रक्षकं ॥ शरणं गृहरक्षित्रो
रित्यमरः ॥ शरणं रक्षणे गृहे इति यादवः ॥ शरणे साधुः शरण्यः तत्र साधुरिति यत्प्रत्ययः
प्रसह्येन बलात्कारेण उद्धृतास्त्रयो येन ॥ नृपतिः राजा जाताभिषंगः जातपराभवः सन् ॥ अ

ततो मृगेंद्रस्य मृगेंद्रगामी वधाय वध्यस्य शरं शरण्यः ॥ जाताभिषं
गो नृपतिर्निषंगादुद्धर्तुमैच्छत्प्रसभोद्धृतारिः ॥ ३० ॥ श्रीरामा ॥

भिषंगः पराभवः इत्यमरः ॥ वध्यस्य वधार्हस्य ॥ दंडादिभ्यो य इति यप्रत्ययः ॥ मृगें
द्रस्य वधाय निषंगात्तूणीरात् ॥ तूणोपासंगतूणीरनिषंगा इषुधिर्द्वयोरित्यम
रः ॥ शरं उद्धर्तुमैच्छत् ॥ ३० ॥ ॥

वामेति ॥ ॥ प्रहर्तुस्तस्य वामेतरो दक्षिणः करः नखप्रभाभिर्भूषिता निविडछुरिता निकंकस्य पत्रिवि
शेषस्य पत्राणि यस्य तस्मिन् ॥ कंकः पक्षिविशेषस्याकारेषु धिष्ठिरे इति विश्वः ॥ कंकस्तु
कर्कट इति यादवः ॥ सायकस्य पुंखे एव कर्तृपरिखे मूलप्रदेशे ॥ कर्तरि पुंख यादवः ॥ सक्ताङ्गु
लिः सन् चित्रार्पितारंभः चित्रलेखितशरोद्धरणोद्योग इवावतस्थे ॥ ३१ ॥ ॥ बाह्विति बा

वामेतरस्तस्य करः प्रहर्तुर्नखप्रभाभूषितकंकपत्रे ॥ सक्ताङ्गुलिः सायकपुंख एव
चित्रार्पितारंभ इवावतस्थे ॥ ३१ ॥ बाहुप्रतिष्टंभविवृद्धमन्युरभ्यर्णमागस्कृतमस्पृ
शद्भिः ॥ राजा स्वतेजोभिरदह्यतांतर्भोगीव मंत्रौषधिरुद्धवीर्यः ॥ ३२ ॥ ॥

होः प्रतिष्टंभेन प्रतिबंधेन विवृद्धमन्युः प्रवृद्धरोषो राजा मंत्रौषधिभ्यां रुद्धवीर्यः प्रति
बंधशक्तिः भोगी सर्प इव ॥ भोगी राजभुजंगयोरिति शाश्वतः ॥ अभ्यर्णं आसन्नं आगस्कृ
तमपराधकारिणं अस्पृशद्भिः स्वतेजोभिरंतरदह्यत ॥ अधिक्षेपाद्यसहनं तेजः प्राणात्य
येप्यपीति यादवः ॥ ३२

तमिति ॥ ॥ निगृहीता पीडिता धेनुर्येन स सिंहः आर्याणां सतां गृह्यं पक्ष्यं ॥ पदास्वैरिबाह्यापक्ष्ये
षु चेति क्यप् ॥ मनुवंशस्य केतुं चिह्नं केतुवत्व्यावर्तकं सिंहस्येवोरुसत्त्वो महाबलं यस्य तं आत्मनो वृत्तौ
बाहुस्तंभव्यापारेऽनुत्पत्त्वा विस्मितं कर्तरि क्तः ॥ तं दिलीपं मनुष्यवाचाकरणेन पुनर्विस्माप
यन् विस्मयमाश्चर्यं प्रापयन् निजगाद ॥ स्मिङ् ईषद्धसने इति धातोर्णिचि वृद्धो आयादेशे प्रत्य
ये च सति विस्मापयन्निति रूपसिद्धं ॥ करणाद्विवक्षायां न कश्चिद्दोषः ॥ ३३ ॥ अलमिति ॥ ॥ हे महीपा

तमार्यगृह्यं निगृहीतधेनुर्मनुष्यवाचा मनुवंशकेतुं ॥ विस्मापयन्विस्मितमात्मवृत्तौ नृ
पालसिंहं निजगाद सिंहः ॥ ३३ ॥ अलं महीपाल तव श्रमेण प्रयुक्तमप्यस्त्रमितो वृथा
स्यात् ॥

ल तव श्रमेण अलं साध्याभावात् श्रमो न कर्तव्य इत्यर्थः ॥ अत्र गम्यमानसाधन
क्रियापेक्षया श्रमस्य करणत्वात् तृतीया ॥ तदुक्तं न्यासोद्योते ॥ न केवलं श्रूयमाणैव क्रियानि
श्री मित्तं करणभावस्यापि तर्हि गम्यमानापीति ॥ अलं भूषणपर्याप्तिशक्तिवारणवाचकमित्य
मरः ॥ इतः अस्मिन्मयि ॥ सार्वविभक्तिकस्तस् ॥ प्रयुक्तमपि अस्त्रं वृथा स्यात् ॥ ॥ ॥

टी.सं. तथाहि॥ ॥पादपोन्मूलनशक्तिर्यस्य तत्तथोक्तं॥ मारुतस्य रंहो वेगः शिलोच्चये पर्वते न मूर्छ सर्ग
१३ ति न प्रसरति॥३४॥ ॥कैलासेति॥ ॥कैलाश इव गौरं श्वेतं वृषमारुरुक्षोरारोढुमिच्छोः॥
चामीकरं च शुभ्रं च गौरमाकर्मनीषिण इति शाश्वतः॥ स्वस्योपरि पदं निक्षिप्य वृषमारोह

न पादपोन्मूलनशक्ति रंहः शिलोच्चये मूर्छति मारुतस्य॥३४॥ कैलास
गौरं वृषमारुरुक्षोः पादार्पणानुग्रहपूतपृष्ठं॥ अवेहि मां किंकरमष्टमूर्तेः
कुंभोदरं नाम निकुंभतुल्यं॥३५॥

तात्पर्यः॥ अष्टौ मूर्तयो यस्य सः॥ तस्याष्ट
मूर्तेः शिवस्य पादार्पणं पादन्यासस्तदेवानुग्रहः प्रसादस्तेन पूतपृष्ठं यस्य तं तथो रा
क्तं॥ निकुंभमित्रं कुंभोदरं नाम किंकरं मामवेहि विधि॥ पृथिवी सलिलं तेजो वायु १३
राकाशमेव च॥ सूर्याचंद्रमसौ सोमयाजी चेत्यष्टमूर्तय इति यादवः॥३५॥ ॥

अमुमिति॥ ॥पुरः अग्रतः अमुं देवदारुं पश्यसि इति काकुः॥ असौ देवदारुः वृषभो ध्वजे यस्य
तेन शिवेन तनूकृतः पुत्रत्वेन स्वीकृतः॥ अमृताज्ञा वेद्धि॥ यो देवदारुः स्कंदस्य मातुर्गौ
र्याः हेम्नः कुंभ एव स्तनस्तस्मान्निःसृतानां पयसामंबूनां रसज्ञः॥ स्वदशः॥ स्कंदपक्षे
हेमकुंभ इव स्तनस्तेनेति विग्रहः॥ पयसां क्षीराणां॥ पयः क्षीरं पयोंबु चेत्यमरः॥ स्कंदस

अमुं पुरः पश्यसि देवदारुं पुत्रीकृतोसौ वृषभध्वजेन॥ यो हेमकुंभस्तननिःसृतानां
स्कंदस्य मातुः पयसां रसज्ञः॥३६॥ कंडूयमानेन कटं कदाचिद्वन्यद्विपेनोन्मथि
ता त्वगस्य॥ अथैनमद्रेस्तनया शुशोच सेनान्यमालीढमिवासुरास्त्रैः॥३७॥ ॥

मानमिति प्रेमास्पदमिति भवः॥३६॥ ॥कंडूयमानेनेति॥ ॥कदाचित्कटं कपोलं कंडूयमाने
न कषता॥ कंडूः आदिस्योपकः॥ ततः श्वानचूः॥ वन्यद्विपेन अस्य देवदारोः त्वक् उन्मथिता॥
अथ अद्रेस्तनया गौरी असुरास्त्रैरालीढं क्षतं सेनान्यं तमिमानानीः स्कंदः॥ पार्वतीनंदनः
स्कंदः सेनानीरित्यमरः॥ सत्सुद्विषेत्यादिना सप्तातमिवैनं शुशोच॥३७॥ ॥

टी॰सं॰ तदेति ॥ तदात्प्रभृतिरादिर्यस्य कर्मणि तत्तथा ॥ तदाप्रभृत्येव द्विपानां त्रासार्थं शूलभृता शिवेन सर्ग
१४ अंकं समीपमागताः प्राप्ताः सत्त्वाः प्राणिनो वृत्तिर्यस्मिन् तत् ॥ अंकः समीपे उत्संगे चिह्ने स्थानापरा
धयोरिति केशवः ॥ सिंहत्वं विधाय अस्मिन् अद्रिकुक्षौ गुहायामहं व्यापारितः नियुक्तः ॥ ३८ ॥ ॥ तस्ये

तदाप्रभृत्येव वनद्विपानां त्रासार्थमस्मिन्नहमद्रिकुक्षौ ॥ व्यापारितः शूलभृता
विधाय सिंहत्वमंकागतसत्त्ववृत्तिः ॥ ३८ ॥ तस्यालमेषा क्षुधितस्य तृप्त्यै प्र
दिष्टकाला परमेश्वरेण ॥ उपस्थिता शोणितपारणा मे सुरद्विषश्चांद्रम
सीकलेव ॥ ३९ ॥

ति ॥ ॥ परमेश्वरेण प्रदिष्टो निर्दिष्टः कालो भोजनवेलाया यस्याः रा॰
सा उपस्थिता प्राप्ता ॥ एषा गोरूपा शोणितपारणा ॥ सुरद्विषो राहोश्चांद्रमसी इ १४
दैः चांद्रमसी सुधेव तस्य क्षुधितस्य बुभुक्षितस्य मे तृप्त्यै पर्याप्ता ॥ नमस्वस्ती
त्यादिना चतुर्थी ॥ ३९ ॥ ॥

स इति ॥ ॥ स एव उपायः तस्य त्वं लज्जां विहाय निवर्तस्व ॥ भवान् त्वं गुरो दर्शिता प्रकाशिता
शिष्यकर्तृकभक्तिर्येन स तथोक्तोसि ॥ ननु गुरुधनं विनाश्य कथं तत्समीपं गंतव्यमत आ
ह ॥ शस्त्रेणेति ॥ यद्रक्ष्यं धनं शस्त्रेण आयुधेन ॥ शस्त्रमायुधे लोहयोरित्यमरः ॥ अशक्या रक्षा

स त्वं निवर्तस्व विहाय लज्जां गुरोर्भवान् दर्शितशिष्यभक्तिः ॥ शस्त्रेण रक्ष्यं
यदशक्यरक्षं न तद्यशः शस्त्रभृतां क्षिणोति ॥ ४० ॥ इति प्रगल्भं पुरुषा
धिराजो मृगाधिराजस्य वचो निशम्य ॥

यस्य तदशक्यरक्षं रक्षितुमशक्य
मित्यर्थः ॥ तद्रक्ष्यं नष्टमपि शस्त्रभृतां यशो न क्षिणोति ॥ न हिनस्ति ॥ अशक्यार्थेषु प्रति
विधानं न दोषायेति भावः ॥ ४० ॥ ॥ इतीति ॥ ॥ पुरुषाणामधिराजो नृप इति प्रगल्भं मृगा
धिराजस्य सिंहस्य वचो ॥ निशम्य श्रुत्वा गिरिशस्येश्वरस्य प्रभावात् ॥ ॥

कुं·टी·
१५
सर्ग

प्रत्याहतास्त्रः कुंठितास्त्रः सन् आत्मनि विषयेऽवज्ञामपमानं शिथिलीचकार त्याजेत्यर्थः ॥ अ
वज्ञातोऽहमिति निर्वेदं न प्रापेत्यर्थः ॥ समाने तु हि क्षत्रियाणामभिमानो न सर्वेश्वरं प्रभवतीति
भावः ॥ ४१ ॥ प्रतीति ॥ स एव पूर्वः प्रथमः संगः प्रतिबंधो यस्य तस्मिन् ॥ तत्पूर्वसंगे
इषुप्रयोगे वितथप्रयत्नो विफलप्रयासः ॥ अत एव वज्रं कुलिशं मुमुक्षन् मोक्तुमिच्छन् ॥ अं

प्रत्याहतास्त्रो गिरिशप्रभावादात्मन्यवज्ञां शिथिलीचकार ॥ ४१ ॥ प्रत्यब्रवीच्चैनमिषुप्रयो
गे तत्पूर्वसंगे वितथप्रयत्नः ॥ जडीकृतस्त्र्यंबकवीक्षितेन वज्रं मुमुक्षन्निव वज्रपाणिः ॥ ४२ ॥

बकं लोचनं ॥ दृग्दृष्टिनेत्रलोचनचक्षुर्नयनांबकेक्षणाक्षिणीति हलायुधः ॥ त्रीणि अंबकानि
यस्य स त्र्यंबको हरस्तस्य वीक्षणेन जडीकृते ॥ निःस्पंदीकृतः ॥ वज्रं पाणौ यस्य स वज्रपाणिः इं
प्रहरणार्थेभ्यः परे निष्ठासप्तम्यौ भवत इति वक्तव्यमिति पाणेः सप्तम्यंतस्योत्तरनिपातः ॥
स इवेत्थितः नृपः ॥ राजसिंहं प्रत्यब्रवीत् ॥ बाहुं सवज्रं शक्रस्य क्रुद्धस्यास्तंभयत्प्रभुरिति म
हाभारते ॥ ४२ ॥

संरुद्धेति ॥ हे मृगेंद्र ॥ संरुद्धचेष्टस्य प्रतिबद्धव्यापारस्य मम तद्वचः वाक्यं कामं हास्यं परि
हसनीयं ॥ यद्वचः स त्वं मदीयेनेत्यादिकमहं विवक्षुः वक्तुमिच्छुरस्मि ॥ तर्हि तूष्णीं स्थीयतामि
त्याशंक्य ईश्वरकिंकरत्वात् सर्वतत्त्वां प्रति न हास्यमित्याह ॥ अंतरिति हि यतः ॥ भवान् प्राण

संरुद्धचेष्टस्य मृगेंद्र कामं हास्यं वचस्तद्यदहं विवक्षुः ॥ अंत
र्गतं प्राणभृतां हि वेद सर्वं भवान् भावमतोऽभिधास्ये ॥ ४३ ॥

भृतामंतर्गतं हृज्जातं वा इत्था बहिरप्रकाशितमेव सर्वं भावं वेद वेत्ति ॥ विदो लटो वेति णला
देशः ॥ अतोऽहमभिधास्ये वक्ष्यामि वच इति प्रकृतं कर्म संबध्यते ॥ अन्ये तु इत्थं वचनमाकर्ण्य
मूढा वनायं एतदिति उपहसंति ॥ अतस्तु मौनमेव भूषणं ॥ त्वं तु वाक्यज्ञानसयोरेकविधवाय
तिमिज्ञानासि ॥ अतोऽभिधास्ये पवचो हं विवक्षुरित्यर्थः ॥ ४३ ॥ ॥

री॰ से
६

मान्य इति॥ ॥प्रत्यवहारः प्रलयः स्थावराणां तरुशैलादीनां जंगमानां मानुषादीनां सर्गस्थितिप्रत्यव हारे षु हेतुः॥ स ईश्वरो मे मम मान्यः पूज्यः अलंघ्यशासन इत्यर्थः॥ शासने च सिंहत्वं शंकागतम त्व इत्नीत्युक्तरूपं तर्हि विसृज्य गम्यतामित्याह॥ गुरोरपीति॥ पुरस्ताद्ग्रे नश्यदिदमाहिताग्नेर्गु रोर्धनं अपि गोरूपं अनुपेक्षणीयं॥ आहिताग्नेरिति विशेषणेन अनुपेक्षाकरणं हविः

मान्यः स मे स्थावरजंगमानां सर्गस्थितिप्रत्यवहारहेतुः॥ गुरोरपीदं धनमाहिता ग्नेर्नश्यत्पुरस्तादनुपेक्षणीयं॥ ४४॥ स त्वं मदीयेन शरीरवृत्तिं देहेन निर्वर्त्तयितुं प्रसीद॥ दिनावसानोत्सुकबालवत्सा विमुच्यतां धेनुरियं महर्षेः॥ ४५॥ ॥ ॥

साधनत्वं सूचयति॥ ४४॥ स इति॥ ॥ शंकागतसत्व इत्नि स्त्वं मदीयेन देहेन शरीरस्य वृत्तिं जीवनं निर्वर्त्तयितुं संपादयितुं प्रसीद दिनावसाने वत्सको माता ममागमिष्यतीत्युत्कं ठितो बालवत्सो यस्याः सा महर्षेरियं धेनुर्विसृज्यतां॥ ४५॥ ॥

सर्ग
रा

अथेति॥ ॥अथ भूतेश्वरस्य पार्श्ववर्ती अनुचरः स सिंहः गिरेर्गह्वराणां गुहानां॥ देवखातबिले गुहा गह्वरमित्यमरः॥ अंधकारं ध्वांतं दंष्ट्रयोर्मयूखैः शकलानि खंडानि कुर्वन्निरस्यन्नित्यर्थः॥ किंचिद्विहस्यार्थपतिं भूयो बभाषे॥ हासकारणं अल्पस्य हेतोर्बहु हातुमिच्छन्निति वक्ष्यमाणं द

अथांधकारं गिरिगह्वराणां दंष्ट्रामयूखैः शकलानि कुर्वन्॥ भूयः स भूतेश्वरपा र्श्ववर्ती किंचिद्विहस्यार्थपतिं बभाषे॥ ४६॥ एकातपत्रं जगतः प्रभुत्वं नवं वयः कां तमिदं वपुश्च॥ अल्पस्य हेतोर्बहु हातुमिच्छन् विचारमूढः प्रतिभासि मे त्वं॥ ४७॥

ष्टव्यं॥ ४६॥ ॥एकेति॥ ॥एकातपत्रं एकछत्रं जगतः प्रभुत्वं स्वामित्वं नवं वयो यौवनं इदं कांतं रम्यं वपुश्चेति॥ एवं बहु अल्पस्य हेतोरल्पेन कारणेन अल्पफलायेत्यर्थः॥ षष्ठी हेतुप्रयोगे इति षष्ठी॥ हातुं त्यक्तुमिच्छन् त्वं विचारे कार्याकार्यविमर्शे मूढो मंदः प्रतिभा सि॥ ४७॥ ॥

र॰टी॰स॰ भूतेति॥ ॥तव भूतेषु अनुकंपा दया करुणा चेत्॥ कृपा दयानुकंपा स्यादित्यर्थः॥ तर्हि त्वदंते तव वना
२ शे सति॥ इयमेका गौः स्वस्तिः क्षेमम् अस्याः अस्तीति स्वस्तिमती भवेत् अक्षतदेहेत्यर्थः॥ स्वस्त्याशीः
क्षेमपुण्यादावित्यमरः॥ हे प्रजानाथ जीवन्पुनः पितेव उपप्लवेभ्यः विघ्नेभ्यः शश्वत्स
दा प्रजाः परिरक्षसि॥ सदा स्वप्राणव्ययेन एकधेनुरक्षणाद्वरं जीवितमेव शश्वदखिलजगत्त्रा

भूतानुकंपा तव चेदियं गौरेका भवेत्स्वस्तिमती त्वदंते॥ जीवन्पुनः शश्वदुपप्लवेभ्यः
प्रजाः प्रजानाथ पितेव पासि॥ ४८॥ अथैकधेनोरपराधचंडाद्गुरोः कृशानुप्रतिमा
द्बिभेषि॥

णमित्यर्थः॥ ४८॥ न धर्मलोपादियं प्रवृत्तिः किंतु गुरुभयादित्यत्राह॥ ॥अथे
ति॥ ॥अथेति पक्षांतरे॥ अथवा एका धेनुर्यस्य तस्मादयं कोपाकरणोपन्यास इति वि
ज्ञेयं॥ अत एवापराधे सति चंडात् अतिकोपनात्॥ चंडस्त्वत्यंतकोपन इत्यमरः॥ अत एव कृशानुः प्रतिमा उपमा यस्य तस्मादग्निकल्पाद्गुरोर्बिभेषि इति काकुः

भीत्रार्थानां भयहेतुरित्यपादाने पंचमी॥ अल्पविघ्नस्य धनहानिरतिदुःसहेति भावः॥
अस्य गुरोर्मन्युः क्रोधः॥ मन्युर्दैन्ये क्रतौ क्रुधीत्यमरः॥ घटा इव ऊधांसि यासां ताः घटोध्नी
ऊधसोऽनङिति नङादेशः॥ बहुव्रीहेरूधसो ङीप्॥ कोटिशो गाः स्पर्शयिता प्रतिपादय
ता॥ विश्राणनं वितरणं स्पर्शनं प्रतिपादनमित्यमरः॥ भवता विनेतुमपनेतुं शक्यः॥ ४

शक्योऽस्य मन्युर्भवता विनेतुं गाः कोटिशः स्पर्शयता घटोध्नीः॥ ४९॥
तद्रक्ष कल्याणपरंपराणां भोक्तारमूर्जस्वलमात्मदेहं॥ महीतलस्पर्शन
मात्रभिन्नमृद्धं हि राज्यं पदमैंद्रमाहुः॥ ५०॥ ९॥ तदिति॥ ॥तत्तस्मात्कारणात्क
ल्याणपरंपराणां भोक्तारं कर्मणि षष्ठी॥ ऊर्जं बलमस्यास्तीत्यूर्जस्वलं॥ ज्योत्स्नातमिस्रे
त्यादिना वलच्प्रत्ययांतो निपातः॥ आत्मदेहं रक्ष ननु गामुपेक्ष्यात्मदेहरक्षणे स्वर्गहा
निः स्यादित्याशंक्याह॥ महीति॥ ऋद्धं समृद्धं राज्यं महीतलस्पर्शनमात्रेण भूतलसंबंधमा
त्रेण भिन्नमैंद्रं पदं स्वर्ग एव तद्बंधि पदं स्थानमाहुः स्वर्गान्न भिद्यत इत्यर्थः॥ ५०॥

रातावदिति॥ ॥मृगेंद्रे एतावदुक्त्वा विरते संति गुहागतेनास्य सिंहस्य प्रतिस्वनेन शिलोच्चयः शैलो
पि प्रीत्या तमेवार्थं क्षितिपालं उच्चैरभाषतेवेत्युत्प्रेक्षा॥ भाषिरविसमानार्थत्वाद्द्विकर्मकः॥ ब्रुविशासिद्विक
र्मकेषु पठितः॥ तदुक्तं॥ दुहियाचिरुधिप्रच्छिभिक्षिचिञामुपयोगनिमित्तमपूर्वविधौ ब्रुविशासिगुणेन च
यत्सचते तदकीर्तितमाचरितं॥ ५१॥ ॥निशम्येति॥ ॥देवानुचरस्येश्वरकिंकरस्य वाचं निशम्य मनुष्यदेवो
रा तावदुक्त्वा विरते मृगेंद्रे प्रतिस्वनेनास्य गुहागतेन॥ शिलोच्चयोपि क्षितिपालमुच्चैः॥ प्रीत्या तमे
वार्थमभाषतेव॥ ५१॥ निशम्य देवानुचरस्य वाचं मनुष्यदेवः पुनरप्युवाच॥ धेन्वा तद
ध्यासितकातराक्ष्या निरीक्ष्यमाणः सुतरां दयालुः॥ ५२॥ राजा पुनरप्युवाच किंभूतः सन्
तेन सिंहेन अध्यासितं आक्रमणं॥ नपुंसके भावे क्तः॥ तेन कातरे अक्षिणी यस्यास्तया॥ बहु
व्रीहौ सक्थ्यक्ष्णोः स्वांगात् षच्॥ षिद्गौरादिभ्यश्चेति ङीष्॥ किंवा वक्ष्यतीति भीत्या वीक्षिते रा
त्यर्थः॥ धेन्वा निरीक्ष्यमाणोऽत एव सुतरां दयालुः सन् सुतरामित्यत्र द्विवचनविभज्येत्या २०
दिना सुशब्दात्तरप्॥ किमेत्तिङव्ययघादाम्वद्रव्यप्रकर्षे इत्यादिना आम् प्रत्ययः॥ तद्धितश्चासर्वविभक्तिरित्य
व्ययसंज्ञा॥ ५२॥ ॥

किमुवाचेत्याह॥ ॥क्षतादिति॥ ॥क्षणु हिंसायामिति धातोः संपदादित्वात्क्विप् गमादीनामिति वक्तव्या
दनुनासिकलोपे तुगागमे क्षदिति रूपं सिद्धं॥ क्षतात्त्राणात्त्रायत इति क्षत्रं॥ सुपीति योगविभागात्
कः॥ तामेतां व्युत्पत्तिं कविरर्थतोऽनुक्रामति॥ क्षतादित्यादिना उदग्रः उन्नतः क्षत्रस्य क्षत्रवर्णस्य शब्दो वाच
कः क्षत्रशब्द इत्यर्थः॥ सोयं क्षतात्त्राणात्त्रायत इति भुवनेषु रूढः किल प्रसिद्धः खलु नाम

क्षतात्किल त्रायत इत्युदग्रः क्षत्रस्य शब्दो भुवनेषु रूढः॥
राज्येन किं तद्विपरीतवृत्तेः प्राणैरुपक्रोशमलीमसैर्वा॥ ५३॥

कर्मादित्वात्के वजरूढः॥ किंतु पंकजादिवद्योगरूढ इत्यर्थः॥ ततः किमित्यत आह॥ ॥तस्य क्षत्रश
ब्दस्य विपरीतवृत्तेर्विपरीतव्यापारस्य क्षतत्राणमकुर्वतः पुंसो राज्येन किं॥ उपक्रोशमलीमसै
र्निंदामलिनैः॥ उपक्रोशो जुगुप्सा च कुत्सा निंदा च गर्हणे इत्यमरः॥ ज्योत्स्नातमिस्रेत्यादिना
मलीमसशब्दो निपातितः॥ तैः प्राणैर्वा किं॥ निंदितस्य सर्वमपार्थमित्यर्थः॥ एतेनैकांत

१व मित्सारिनास्तो कदये येनो क्तं दत्तोत्तरमितिवेदितव्यं ॥ ५३ ॥ ॥ अथैकधेनोरित्युत्तरमाह ॥ ॥ कथमिति ॥ ॥ अनुनयः क्रोधापनयः च कारो वाकारार्थः ॥ महर्षेरनुनयो वा मा सां पयस्विनीनां दोग्ध्रीणां गवां विश्राणना दानात्कथं नु शक्य इत्यर्थः ॥ अत्र हेतुमाह ॥

कथं नु शक्योऽनुनयो महर्षेर्विश्राणनाच्चान्यपयस्विनीनां ॥
इमामनूनां सुरभेरवेहि रुद्रौजसा तु प्रहृतं त्वयास्यां ॥ ५४ ॥

इमां गां सुरभेः कामधेनोः पंचमी विभक्त इति पंचमी ॥ अनूनामन्यूनां अवेहि जानीहि ॥ तर्हि कथमस्याः परिभवोऽभूदित्याह ॥ ॥ रुद्रेति ॥ ॥ अस्यां गवि त्वया कर्तृभूतेन तं तु प्रहारस्तु ॥ नपुंसके भावे क्तः ॥ रुद्रौजसा ईश्वरसामर्थ्येन न तु न वेत्यर्थः ॥ सत्यम्यधिकरणे चेति सप्तमी ॥ ५४ ॥

तर्हि किं चिकीर्षितमित्यत्राह ॥ ॥ सेयमिति ॥ ॥ सेयं गौर्मया निष्क्रीयते प्रत्याक्रियते ॥ नेन परगृहीतमिति निष्क्रयः ॥ प्रतिशीर्षकं इत्यमरः ॥ एरजिति अच् प्रत्ययः ॥ स्वदेहार्पणमेव निष्क्रयस्तेन भवता त्वतः पंचम्यास्तसिल् ॥ मोचयितुं न्याय्या न्यायादनपेता युक्तेत्यर्थः ॥ धर्मपथ्यर्थन्यायादनपेत इति यत् प्रत्ययः ॥ एवं सति तव पारणा भोजनं न विहता न स्यात् मुनेः क्रिया होमादिः सैवार्थः प्रयोजनं सचालुप्तः ॥

सेयं स्वदेहार्पणनिष्क्रयेण न्याय्या मया मोचयितुं भवत्तः ॥ न पारणा स्याद्विहता तवैवं भवेदलुप्तश्च मुनेः क्रियार्थः ॥ ५५ ॥ भवानपीदं परवानवैति महान् हि यत्नस्तव देवदारौ ॥

भवेत् ॥ स्वप्राणव्ययेनापि स्वामिगुरुधनं संरक्ष्यमिति भावः ॥ ५५ ॥ ॥ अत्र भवानेव प्रमाणमित्याह ॥ ॥ भवानिति ॥ ॥ परवान् स्वामिपरतंत्रो भवानपीदं वक्ष्यमाणमवैति वेत्ति ॥ भवताऽनुभूयत एवेत्यर्थः ॥ शेषे प्रथम इति प्रथमपुरु[illegible] मित्यत्राह हि यस्मात् धेनो ॥ हि हेतावधारणे इत्यमरः ॥ तव देवदारौ विषये [illegible] नृपतेः ॥ ॥

टी·सं
१०
महता यत्नेन रक्ष्य इत्यर्थः ॥ इदमत्राद्व्योक्तमर्थं दर्शयति ॥ स्थातुमिति ॥ ॥ रक्ष्यं वस्तु विना श्य
श्य विनाशं गमयित्वा स्वयमक्षतेनाव्रणेन नियुक्तेनेति शेषः ॥ नियोक्तुः स्वामिनोऽग्रे स्था
तुं न शक्यं ॥ ५६ ॥ ॥ सर्वथा चैतदप्रतिहार्यमित्याह ॥ ॥ किमिति ॥ किं वा हं तव अहिंस्यः अ
वध्यो मतश्चेत्तर्हि मे यशःशरीरं तस्मिन्दयालुर्भव ॥ ननु मुख्यमुपेक्ष्यामुख्ये शरी

स्थातुं नियोक्तुर्यद्शक्यमग्रे विनाश्य रक्ष्यं स्वयमक्षतेन ॥ ५६ ॥ किमप्यहिंस्य
स्तव चेन्मतोऽहं यशःशरीरे भव मे दयालुः ॥ एकांतविध्वंसिषु मद्विधानां पिंडेष्व
नास्था खलु भौतिकेषु ॥ ५७ ॥ रेऽभिनिवेशः कुत आह ॥ एकांतेति ॥ मद्विधानां मा
दृशानां विवेकिनां एकांतविध्वंसिष्ववश्यविनाशिषु भौतिकेषु पृथिव्यादिभूतविकारेषु पि
डेषु शरीरेष्वनास्था अनपेक्षा ॥ आस्थालंबनास्थानयत्नापेक्षासु कथ्यत इति वि
श्वः ॥ ५७ ॥ ॥

सौहार्ददिहमनुस्मरणीयं इत्याह ॥ ॥ संबंधमिति ॥ ॥ संबंधः सख्यं आभाषणमालापः पूर्वं कार
णं यस्य तमाहुः ॥ स्यादाभाषणमालाप इत्यमरः ॥ स तादृक्संबंधो वनांते संगतयोः नौ आ
वयोर्वृत्तो जातः ॥ तत् तस्माद्धे भूतनाथानुग शिवानुचर एतेन तस्य महत्त्वं सूचयति ॥ अत
एवं संबंधिनो मित्रस्य मे प्रणयं याञ्चां ॥ प्रणयास्त्वमी विस्रंभयाञ्चाप्रेमाण इत्यमरः ॥ किं वि
संबंधमाभाषणपूर्वमाहुर्वृत्तः स नौ संगतयोर्वनांते ॥ तद्भूतनाथानुग नार्हसि त्वं संबं
धिनो मे प्रणयं विहंतुं ॥ ५८ ॥ तथेति गामुक्तवते दलीपः सद्यः प्रतिष्टंभविमुक्तबाहुः ॥
स न्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिंडमिवामिषस्य ॥ ५९ ॥ हंतुं नार्हसि ॥ ५८ ॥ तथे
ति ॥ ॥ तथेति गामुक्तवते हरये सिंहाय ॥ कपौ सिंहे सुवर्णे च विष्णौ वर्णे हरिं विदुरिति श्वा
श्वतः ॥ सद्यस्तत्क्षणे प्रतिष्टंभान्निबंधाद्विमुक्तो बाहुर्यस्य स दिलीपो न्यस्तशस्त्रः त्यक्तायुधः
सन्स्वदेहमामिषस्य मांसस्य ॥ पललं क्रव्यमामिषमित्यमरः ॥ पिंडं कवलमिवोपानयत्सम
र्पितवान् एतेन निर्ममत्वमुक्तं ॥ ५९ ॥ ॥

रघु·टी·

१

तस्मिन्निति॥ ॥तस्मिन्क्षणे उग्रं सिंहनिपातं उत्पश्यत उत्प्रेक्षमाणस्य तर्कयतो अवाङ्मु
खस्याधोमुखस्य प्रजानां पालयितुः राज्ञः उपरि उपरिष्टात्॥ उपर्युपरिष्टादिति निपा
तः॥ विद्याधराणां देवयोनिविशेषाणां हस्तैर्मुक्ता पुष्पवृष्टिः पपात॥६०॥ ॥उत्तिष्ठेति॥
तस्मिन्क्षणे पालयितुः प्रजानामुत्पश्यतः सिंहनिपातमुग्रं॥ अवाङ्मुखस्यो
परि पुष्पवृष्टिः पपात विद्याधरहस्तमुक्ता॥ ६०॥ उत्तिष्ठ वत्सेत्यमृतायमानं वचो निशम्योत्थितमुत्थितः सन्॥ ददर्श राजा जननीमिव स्वां गाम
ग्रतः प्रस्रविणीं न सिंहं॥ ६१॥ राजा अमृतमिवाचरतीत्यमृतायमानं॥ उप
मानादाचारे इति क्यच्॥ ततः शानच्॥ उत्थितं उत्पन्नं हे वत्स उत्तिष्ठेति वचो
निशम्य श्रुत्वा उत्थितः सन्॥ अस्तेः शतृप्रत्ययः॥ अग्रतोऽग्रे प्रस्रवक्षीरस्रावो
ऽस्यास्तां प्रस्रविणीं गां स्वां जननीमिव ददर्श सिंहं न ददर्श॥ ६१॥ ॥

सर्ग·

२

त मिति॥ ॥विस्मितमाश्चर्यं गतं॥ कर्तरि क्तः॥ तं दिलीपं धेनुरुवाच॥ किमित्यत्राह॥ हे साधो
मया मायामुद्भाव्य कल्पयित्वा परीक्षितोसि॥ ऋषिप्रभावान्मयि अन्तकोयमोपि प्रहर्तुं न प्र
भुर्न समर्थः॥ अन्ये हिंस्राः घातुकाः॥ शरारुर्घातुको हिंस्र इत्यमरः॥ नमिकंपीत्यादिना र
प्रत्ययः॥ किमुत सुष्ठु न प्रभवइति योज्यं॥ बलवत्सुष्ठु किमुत स्वत्यती व च न नो भर इत्यम
तं विस्मितं धेनुरुवाच साधो मायां मयोद्भाव्य परीक्षितोसि॥ ऋषिप्रभावान्मयि नान्तको
पि प्रभुः प्रहर्तुं किमुतान्य हिंस्राः॥ ६२॥ भक्त्या गुरौ मय्यनुकंपया च प्रीतास्मि ते व
त्स वरं वृणीष्व॥ न केवलानां पयसां प्रसूतिमवेहि मां कामदुघां प्रसन्नां॥ ६३॥
रः॥ ६२॥ ॥भक्त्येति॥ ॥हे पुत्र गुरौ भक्त्या मयि अनुकंपया च ते तुभ्यं प्रीतास्मि क्रियाग्रहण
मपि कर्तव्यमिति चतुर्थी॥ वरं देवेभ्यो वरणीयमर्थं॥ देवाद्वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक्प्रिय
मित्यमरः॥ वृणीष्व स्वीकुरुष्व॥ तथा हि॥ मां केवलानां पयसां प्रसूतिं कारणं न त्ववेहि न वि
द्धि॥ किंतु प्रसन्नां मां कामान्दोग्धीति कामदुघा तामवेहि॥ दुह कब्घश्चेति कप्प्रत्ययः॥ ६३॥

॥ टी॰सं॰ २ ततइति॥ ततो मानितार्थी स्वहस्तार्जितो वीर इति शब्दो येन सः॥ एतेनास्य दातृत्वं दैन्यराहि- सर्ग॰
त्यं चोक्तं॥ स राजा हस्तौ समानीय संधाय न्यञ्जलिं बध्वेत्यर्थः॥ वंशस्य कर्त्तारं॥ अत एव रघु-
कुलमिति प्रसिद्धिः॥ अनंतकीर्त्तिं स्त्रियं परंज्ञासं तनयं सुदक्षिणायां ययाचे॥ ६४॥ संतानेति॥

ततः समानीय समानितार्थी हस्तौ स्वहस्तार्जितवीरशब्दः॥ वंशस्य कर्त्तारमनंत-
कीर्त्तिं सुदक्षिणायां तनयं ययाचे॥ ६४॥ संतानकामाय तथेति कामं राज्ञे प्रतिश्रु-
त्य पयस्विनी सा॥ दुग्ध्वा पयः पत्रपुटे मदीयं पुत्रोपभुंक्ष्वेति तमादिदेश॥ ६५॥

सा पयस्विनी गौः संतानं कामयत इति संतानकामः॥ कर्मण्यण्॥ तस्मै राज्ञे तथेति का-
म्यत इति कामो वरः॥ कामार्थे घञ् प्रत्ययः॥ तं प्रतिश्रुत्य प्रतिज्ञाय हे पुत्र मदीयं पयः २
पत्रपुटे पत्रनिर्मिते पात्रे दुग्ध्वा उपभुंक्ष्व पिबेति॥ उपयुंक्ष्वेति वा पाठः॥ तमादिदेशाज्ञा- २
ज्ञापितवती॥ ६५॥

वत्सस्येति॥ हे मातः वत्सस्य वत्सपीतस्य शेषं वत्सपानावशिष्टमित्यर्थः॥ होम एवार्थः तस्य वि-
धिरनुष्ठानं तस्य शेषं होमावशिष्टमित्यर्थः॥ तव ऊधसि भूयं ऊधस्यं क्षीरं॥ शरीरावयवाच्चे-
ति यत्प्रत्ययः॥ रक्षितायाः उर्व्याः षष्ठांशं षष्ठभागमिव रूषेरनुज्ञामधिगम्य उपभोक्तुमि-

वत्सस्य होमार्थविधेश्च शेषं गुरोरनुज्ञामधिगम्य मातः॥ ऊधस्यमिच्छामि तवोपभोक्तुं
षष्ठांशमुर्व्या इव रक्षितायाः॥ ६६॥ इत्थं क्षितीशेन वसिष्ठधेनुर्विज्ञापिता प्रीततरा ब-
भूव॥ तदन्विता हैमवताच्च कुक्षेः प्रत्याययावाश्रममश्रमेण॥ ६७॥

च्छामि॥ ६६॥ इ-
ति॥ ॥ इत्थं क्षितीशेन विज्ञापिता वसिष्ठस्य धेनुः प्रीततरा पूर्वं शुश्रूषया प्रीता संप्र-
ति अनया विज्ञापनया प्रीततरा अतिसंतुष्टा बभूव॥ तदन्विता तेन दिलीपेनान्विता है-
मवताद्धिमवत्संबंधिनः कुक्षेः गुहायाः सकाशात् अश्रमेण अनायासेन॥ आश्रमं प्रत्याययौ प्र-
आगता॥ ६७॥ ॥

तस्या इति ॥ ॥ प्रसन्नेंदुरिव मुखं यस्य सन्नृपाणां गुरुर्दिलीपः प्रहर्षचिन्हैर्मुखरागादिभिरनुमितम सर्ग०
नुहितं तस्याः धेन्वाः प्रसादमनुग्रहं प्रहर्षचिन्हैरेव ज्ञाततत्वात् पुनरुक्तमेव वाचा गुरवे निवे
द्य विज्ञाप्य पश्चात् प्रियायै राज्ञ्यै शंस कथितस्यैव कथनं पुनरुक्तिः ॥ न चेह तदस्ति ॥ किंतु वि
ज्ञैः कथितन्यायत्वात् पुनरुक्तयेवस्थितयेत्युपेक्षा ॥ ६८ ॥ ॥स इति ॥ ॥ अनिंदितात्मा अ

तस्याः प्रसन्नेंदुमुखः प्रसादं गुरुर्नृपाणां गुरवे निवेद्य ॥ प्रहर्षचिन्हानुमितं प्रियायै
शशंस वाचा पुनरुक्तयेव ॥ ६८ ॥ स नंदिनीस्तन्यमनिंदितात्मा सद्वत्सलो वत्सनि
पीतशेषं ॥ पपौ वसिष्ठेन कृताभ्यनुज्ञः शुभ्रं यशो मूर्तमिवातितृष्णः ॥ ६९ ॥ ॥

गर्हितस्वभावः ॥ सत्सु वत्सलः प्रेमवान् सद्वत्सलः ॥ वत्सांसाभ्यां कामबले इति वल रा०
च् प्रत्ययः ॥ वसिष्ठेन कृताभ्यनुज्ञः कृतानुमतिः सन् वत्सस्य हुतस्य चाग्नेः शेषं पीत २३
हुतावशिष्टं नंदिन्याः स्तन्यं क्षीरं शुभ्रं मूर्तं परिच्छिन्नं यश इवातितृष्णः सन्नृपः पपौ ॥ ६९

प्रातरिति ॥ ॥ वशी वसिष्ठः ॥ प्रातर्यथोक्तस्य पूर्वोक्तस्य व्रतस्य गोसेवारूपस्यांगभूताया पारणा तस्याः
अंते प्रास्थानिकं प्रस्थाने भवं तत्कालोचितमित्यर्थः ॥ कालात् ठञ् भवेऽनुवृत्तिरपि प्रत्ययः ॥ यथाश
यचिकुणष्टस्यापि काले वर्तमानत्वात् स्वस्त्ययनं इष्यत इति वृत्तिकारः ॥ ईयते प्राप्यतेऽनेनेत्ययनं स्व
स्त्ययनं शुभावहमाशीर्वादं प्रयुज्य तौ दंपती स्वां राजधानीं पुरीं प्रति प्रस्थापयामास ॥ ७० ॥

प्रातर्यथोक्तव्रतपारणांते प्रास्थानिकं स्वस्त्ययनं प्रयुज्य ॥ तौ दंपती स्वां प्रति राजधानीं प्र
स्थापयामास वशी वसिष्ठः ॥ ७० ॥ प्रदक्षिणीकृत्य हुतं हुताशं ततस्तु होतारमरुंधतीं
च ॥ धेनुं सवत्सां च नृपः प्रतस्थे सन्मंगलोदग्रतरप्रभावः ॥ ७१ ॥

प्रदक्षिणेति ॥ ॥ नृपो हु
तमश्नातीति हुताशनं ॥ कर्मण्यण् ॥ तं भर्तुर्मुनेरनंतरं प्रदक्षिणानंतरमित्यर्थः ॥ अरुंधतीं
च सवत्सां धेनुं च प्रदक्षिणीकृत्य प्रगता दक्षिणं ॥ तिष्ठद्गुप्रभृतीनि चेत्यव्ययीभावः ॥
ततश्च्वितः ॥ अप्रदक्षिणं प्रदक्षिणं संपद्यमानं कृत्वा प्रदक्षिणीकृत्य ॥ सन्निर्मंगलैः प्रद
क्षिणादिभिर्मंगलाचारैरुदग्रतरप्रभावः सन्प्रतस्थे ॥ ७१ ॥ ॥

श्रोत्रेति॥॥ धर्मपत्नीसहितः सहिष्णुः व्रतादिक्लेशसहनशीलः॥ स नृपः श्रोत्राभिरामध्वनिना॥ स॰
मार्गमनुद्घातः पाषाणादिप्रतिघातरहितो। तत एव सुखयतीति सुखस्तेन रथेन पूर्णेन सकलेन
मनोरथेनेव ययौ॥ मनोरथपक्षे ध्वनिः स्फूर्तिः। अनुद्घातः प्रबंधनिवृत्तिः॥ ७२॥ तमिति॥
व्रतदर्शने प्रवासनिमित्तेनाहितौत्सुक्यं जनितदर्शनोत्कंठं प्रजार्थं संतानार्थं व्रतेन नियमे

श्रोत्राभिरामध्वनिना रथेन स धर्मपत्नीसहितः सहिष्णुः॥ ययावनुद्घातसुखेन मार्गं स्वेनेव
संपूर्णेन मनोरथेन॥ ७२॥ तमाहितौत्सुक्यमदर्शनेन प्रजाः प्रजाव्रतकर्शितांगं॥ नेत्रैः
पपुस्तृप्तिमनाप्नुवद्भिर्नवोदयं नाथमिवौषधीनां॥ ७३॥

व्रतकर्शितं कृशीकृतं अंगं यस्य
तं नवोदयं नवाभ्युदयं प्रजास्तृप्तिमनाप्नुवद्भिरतितृष्णुभिर्नेत्रैरोषधीनां नाथं सोममिव
पपुः॥ अत्यास्थया ददृशुरित्यर्थः॥ चंद्रपक्षे दर्शने कलाक्षयनिमित्ते प्रजार्थं लोकहितार्थं रा॰
व्रतं देवताभिः कलादाननियमः॥ तं च सोमं पपुर्देवाः॥ पर्यायेणानुपूर्व्येणेति व्यासः॥ उद २
यश्चाविर्भावोऽन्यत्समानं॥ ७३॥ ॥

पुरंदरेति॥ ॥ पुरः पुरीरसुराणां दारयतीति पुरंदरः शक्रः। पूः सर्वयोर्दारिसहोरिति ख-
च् प्रत्ययः। वाचंयमपुरंदरौ चेति मुमागमनिपातः। तस्य श्रीरिव श्रीर्यस्य स नृपः पौरैर-
भिनंद्यमानः॥ उत्पताकं उच्छ्रितध्वजं॥ पताका वैजयंती स्यात्केतनं ध्वजमस्त्रियामि-

पुरंदरश्रीः पुरमुत्पताकं प्रविश्य पौरैरभिनंद्यमानः॥ भुजे
भुजंगेंद्रसमानसारे भूयः स भूमेर्धुरमाससंज॥ ७४॥॥

त्यमरः॥ पुरं प्रविश्य भुजगेंद्रेण समानसारे तुल्यबले। सारो बले स्थिरांशे च न्या-
य्ये क्लीबं वरे त्रिष्विति त्यमरः॥ भुजे भूयो भूयो धुरमाससंज आरोपितवान्॥ ७४॥ ॥

अथेति॥ ॥अथ द्यौः सुरवर्त्म। द्यौः स्वर्गसुरवर्त्मनोरिति विश्वः॥ अत्रेर्महर्षेर्नयनात्समुत्था उ
त्पन्नं ज्योतिरिव॥ आतश्चोपसर्ग इति कप्रत्ययः॥ तज्ज्योतिरिव चंद्रमिवेत्यर्थः॥ रुक्षेशः स्याद्
त्रिनेत्रप्रसूत इति हलायुधः॥ चंद्रस्यात्रिनेत्रोद्भूतत्वं उक्तं॥ हरिवंशे॥ नेत्राभ्यां परिसुस्राव द
शधा द्योतयन्दिशः। तं गर्भं दिशा धारुष्टा दिशो देव्यो दधुस्तदा॥१॥ समेत्य धारयामासुर्न च ता
स्तामशक्नुवन्॥ स ताभ्यः सहसैवाथ दिग्भ्यो गर्भः प्रभान्वितः॥२॥ पपात भावयन्लोकान्

अथ नयनसमुत्थं ज्योतिरत्रेरिव द्यौः सुरसरिदिव तेजो वह्निनिष्ठ्यूतमैशं॥ ॥

शीतांशुः सुरभावन इति॥ सुरसरिद्गंगा वह्निना निष्ठ्यूतं विक्षिप्तं॥ छ्वोः शूडनुनासिके चेत्यनेन नि
ष्ठ्यूतिः ष्ठिवतेर्वकारस्य ऊठ्॥ नुन्ननुत्तास्तनिष्ठ्यूतमिति विद्धक्षिप्तेरिताः समाः इत्यमरः॥ ऐशं तेजः स्कं
दमिव॥ अत्र रामायणं॥ तेन त्वा पर्वतं राम केवलं धातुमंडितं॥ अग्निं संयोजयामास सुः पुत्रार्थं स दैव
त॥१॥ देवकार्यमिदं देव समाधत्स्व कृताशन॥ शैलपुत्र्यां महत्तेजो गंगायां तेज उत्सृज॥२॥ देवतानां प्र
तिज्ञाय गंगामभ्येत्य पावकः॥ गर्भं धारय वै देवि देवतानामिमं प्रियं॥३॥ इत्येतद्वचनं श्रुत्वा दिव्यं रू
पमधारयत्॥ तस्या महिमानं दृष्ट्वा समंता [illegible] वकीर्यत॥४॥ ॥

समंततस्तदा देवीमभ्यषिंचत पावकः॥ सर्वस्रोतांसि पूर्णानि गंगाया रघुनंदनेति॥ ५॥
सुदक्षिणा नरपतेर्दिलीपस्य कुलाभ्युदयाय संततिलक्षणाय गुरुभिर्महद्भिर्लोकपालानां ना
मावैस्तेजोभिरभिनिविष्टं गर्भमाधत्त दधावित्यर्थः॥ अत्र मनुः॥ ॥अष्टानां लोकपालानां वपु
र्धारयते नृपः॥ इति॥ आधत्तेत्यनेनात्र स्त्रीकर्तृधारणमात्रमुच्यते तथा च मंत्रवर्णे॥ यथे
यं पृथिवी मह्युत्ताना गर्भमाधत्त एवं त्वं गर्भमाधेहि दशमे मासि सूतवे इत्याश्वलायनानां सू

नरपतिकुलभूत्यै गर्भमाधत्त राज्ञी गुरुभिरभिनिविष्टं लोकपालानुभावैः॥ ७५॥

॥ ॥इति श्रीरघुवंशे महाकाव्ये कविश्रीकालिदासकृतौ नंदिनीवरप्रदानो नाम
द्वितीयः सर्गः॥ २॥ अत्र तत्रेस्त्रीव्यापारधारणे शब्दप्रयोगदर्शनादिति॥ मालिनीवृ
त्तमिति॥ तदुक्तं ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात्॥ ७५॥ ॥इति श्री
पदवाक्यप्रमाणपारावारीण महोपाध्याय कोलचलमल्लिनाथसूरिविरचितायां रघु
वंशव्याख्यायां संजीविनीसमाख्यायां द्वितीयः सर्गः॥ २॥ ॥श्रीरस्तु॥ ॥

ग्राम
अम